२१

248sk21

शङ्कितस्य दुर्योधनस्य नीतिकौशलम्

प्रस्तावना

युधिष्ठिरात् भीतोऽपि दुर्योधनः सततम् आत्मानं भयरहितं प्रकटयति स्म। स्वयम् अविश्वस्तोऽपि विश्वस्तवद् व्यवहरति स्म। सन्देहयुक्तः सन् स्वस्य रक्षार्थम् विश्वस्तान् आत्मीयान् स्वकीये परकीये च राज्ये सर्वत्र संस्थापितवान्।सामदानदण्डभेदानां चतुर्णाम् उपायानां विनियोगे कुशलेन दुर्योधनेन यथोचितं प्रयुक्ताः एते चत्वारः उपायाः कथं परस्परं स्पर्धां कुर्वन्तः तस्य दुर्योधनस्य सर्वेषु कार्येषु सफलतां तथा समृद्धिं सम्पादयन्ति स्म तद् भवन्तः पाठेऽस्मिन् ज्ञास्यन्ति। बहूनां नृपाणां रथाश्वैः व्याप्तं दुर्योधनस्य सभाभवनाङ्गणं कथं शोभते स्म तदपि ज्ञास्यन्ति। एतेन च राज्ञः दुर्योधनस्य प्रभुत्वस्य आतिशय्यं विशेषेण प्रकाशितोऽभूत् इति पठिष्यन्ति। बहुदिनं यावत् प्रजासु कल्याणं वितरतः दुर्योधनस्य धनाधिपतेः कुवेरस्य इव अस्य दयादाक्षिण्यादिभिः गुणैः कथं पृथिवी द्रवीभूता सञ्जाता। किञ्च तेन सम्मानिताः वीरसैनिकाः कीदृशा आसन् इति पाठात् अस्मात् ज्ञास्यते। सर्वे राजानः प्रसन्नाः सन्तः कथं तस्य शासनस्य अनुगमनं कुर्वन्ति स्म इति बोधः भविष्यति। तेन च राज्ञा दुर्योधनेन शास्त्रानुसारं केन प्रकारेण यागाः अनुष्ठीयते स्म इति स्पष्टीभविष्यति। बलबद्भिः सह विरोधः दुष्परिणामः भवति इति जानता तेन कथं तादृशम् आचरति इति जिज्ञासापि दूरीभविष्यति।

उद्देश्यानि

अमुं पाठं पठित्वा भवान् -

- दुर्योधनः शङ्कितः सन् किं करोति इति ज्ञास्यति।
- सर्वे नृपाः कथं तस्य अनुगताः आसन् इति स्पष्टं भविष्यति।
- सः प्रजानां कल्याणाय किं किं कृतवान् आसीत् इति ज्ञास्यति।
- तस्य सैनिकाः कीदृशाः आसन् इति स्पष्टीभविष्यति।
- बलवद्भिः सह विरोधस्य किं फलम् इति ज्ञास्यति।
- श्लोकानां सुष्ठु व्याख्यानं कथं करणीयम् इति च अधिगमिष्यति।

२१.१) मूलपाठः

विधाय रक्षान्परितः परेतरानशङ्किताकारमुपैति शङ्कितः ।
क्रियापवर्गेष्वनुजीविसात्कृताः कृतज्ञतामस्य वदन्ति सम्पदः ।। १.१४ ।।

अनारतं तेन पदेषु लम्भिता विभज्य सम्यग्विनियोगसत्क्रियाम् ।
फलन्त्युपायाः परिबृंहितायतीरुपेत्य संघर्षमिवार्थसम्पदः ।। १.१५ ।।

अनेकराजन्यरथाश्वसंकुलं तदीयमास्थाननिकेतनाजिरम्।
नयत्ययुग्मच्छदगन्धिरार्द्रतां भृशं नृपोपायनदन्तिनां मदः ।। १.१६ ।।

सुखेन लभ्या दधतः कृषीवलैरकृष्टपच्या इव सस्यसम्पदः ।
वितन्वति क्षेममदेवमातृकाश्चिराय तस्मिन्कुरवश्चकासति ।। १.१७ ।।

महौजसो मानधना धनार्चिता धनुर्भृतः संयति लब्धकीर्तयः ।
न संहतास्तस्य न भेदवृत्तयः प्रियाणि वाञ्छन्त्यसुभिः समीहितुम् ।। १.१८ ।।

उदारकीर्तेरुदयं दयावतः प्रशान्तबाधं दिशतोऽभिरक्षया ।
स्वयं प्रदुग्धेऽस्य गुणैरुपस्नुता वसूपमानस्य वसूनि मेदिनी ।। १.१९ ।।

महीभुजां सच्चरितैश्चरैः क्रियाः स वेद निःशेषमशेषितक्रियः ।
महोदयैस्तस्य हितानुबन्धिभिः प्रतीयते धातुरिवेहितं फलैः ।। १.२० ।।

न तेन सज्यं क्वचिदुद्यतं धनुर्न वा कृतं कोपविजिह्ममाननम् ।
गुणानुरागेण शिरोभिरुह्यते नराधिपैर्माल्यमिवास्य शासनम् ।। १.२१ ।।

स यौवराज्ये नवयौवनोद्धतं निधाय दुःशासनमिद्धशासनः ।
मखेष्वखिन्नोऽनुमतः पुरोधसा धिनोति हव्येन हिरण्यरेतसम् ।। १.२२ ।।

प्रलीनभूपालमपि स्थिरायति प्रशासदावारिधि मण्डलं भुवः ।
स चिन्तयत्येव भियस्त्वदेष्यतीरहो दुरन्ता बलवद्विरोधिता ।। १.२३ ।।

२१.२) साम्प्रतं मूलपाठम् अवगच्छाम

विधाय रक्षान्परितः परेतरानशङ्किताकारमुपैति शङ्कितः।
क्रियापवर्गेष्वनुजीविसात्कृताः कृतज्ञतामस्य वदन्ति सम्पदः।।१४

अन्वयः - शङ्कितः (सन्नपि) परितः परेतरान् रक्षान् विधाय अशङ्किताकारम् उपैति। क्रियापवर्गेषु अनुजीविसात्कृताः सम्पदः अस्य कृतज्ञतां वदन्ति।

अन्वयार्थः - शङ्कितः सन्देहयुक्तः सन्देहापन्नः सन् स दुर्योधनः, परितः सर्वतः सर्वत्र स्वकीयराज्ये परकीये च, परेतरान् परेभ्यः शत्रुभ्यः इतरान् विश्वस्तान् आत्मीयजनान्, रक्षान् रक्षकान्

रक्षन्ति गुप्तमन्त्रणादिकं ये तान् परवृत्तान्तज्ञाने कुशलान्, विधाय नियुज्य, अशङ्किताकारं विश्वस्ताकृतिम्, उपैति प्राप्नोति। स्वयं शङ्कितः अपि अशङ्किताकारम् एव दर्शयति इत्यर्थः। क्रियापवर्गेषु कार्यावसानेषु कर्मणां समाप्तिषु, अनुजीविसात्कृताः अनुजीविनां भृत्यानाम् आयत्तीकृताः अनुजीविसात्कृताः भृत्येभ्यः दत्ताः इत्यर्थः। सम्पदः सम्पत्तयः धनानि, अस्य दुर्योधनस्य, कृतज्ञताम् उपकारज्ञताम्, वदन्ति ज्ञापयन्ति प्रकाशयन्ति।

सरलार्थः - शत्रूणां बलस्य आधिक्यात् राजा दुर्योधनः शङ्कितः अस्ति। अतः स्वकीये परकीये च राज्ये आत्मीयान् जनान् संरक्षकरूपेण संस्थाप्य विश्वस्ताकृतिं प्राप्नोति। मनसि भयम् अनुभवन् अपि आत्मानं भयरहितं प्रकटयति। कर्मणाम् अवसानेषु सेवकेभ्यः समर्पिताः सम्पत्तयः दुर्योधनस्य कृतज्ञतां च प्रकाशयन्ति।

तात्पर्यार्थः - अत्र श्लोके अस्मिन् दुर्योधनस्य भयभावः, सुरक्षाव्यवस्था तथा धनादीनां प्रभूतदानेन कृतज्ञतादिभावाः निरूपिताः। तथाहि स्वयम् निरन्तरम् अविश्वस्तः सन् अपि विश्वस्तवद् व्यवहरति। किञ्च सन्देहयुक्तः भयाकुलः अपि निर्भीकतां दर्शयति। अत एव सः स्वस्य रक्षार्थम् विश्वस्तान् आत्मीयान् सर्वत्र संस्थाप्य तिष्ठति। किञ्च स्वस्य कृतज्ञतां प्रकटयितुं कार्यावसाने भृत्येभ्यः धनानि समर्पयति।

व्याकरणविमर्शः -

- परेतरान्-परेभ्य इतरे परेतरे तान् परेतरान्।
- अशङ्किताकारम् - शङ्का जाता अस्य इति शङ्कितः, न शङ्कितः अशङ्कितः, अशङ्कितः आकारो यस्मिन् इति अशङ्किताकारम् (क्रियाविशेषणम्)।
- कृतज्ञताम् - कृतं जानाति इति कृत्तज्ञः तस्य भावःकृतज्ञता, ताम् कृतज्ञताम्।
- विधाय – वि-धा-धातोः क्त्वोः ल्यपि रूपम्। उपैति - उप-इण्-धातोः लटि रूपम्।

सन्धिकार्यम्-

- क्रियापवर्गेष्वनुजीविसात्कृताः = क्रियापवर्गेषु + अनुजीविसात्कृताः।

प्रयोगपरिवर्तनम् -

शङ्कितेन तेन परितः परेतरान् रक्षान् विधाय अशङ्किताकारम् उपेयते। क्रियापवर्गेषु अनुजीविसात्कृताभिः सम्पद्भिः अस्य कृतज्ञता उद्यते।

अलङ्कारालोचना -

- अत्र वृत्त्यनुप्रासालङ्कारः विद्यते। रकार-तकारयोः असकृत् आवृत्तिरत्र हेतुः।

कोषः -

- परितः - "समन्ततस्तु परितः सर्वतो विष्वगित्यपि"इत्यमरः।

पाठगतप्रश्नाः-१

१. कः अशङ्किताकारम् उपैति।

२. स च कीदृशः सन् अशङ्किताकारम् उपैति।

३. स च केन उपायेन अशङ्किताकारम् उपैति।

४. कीदृशाः सम्पदः तस्य कृतज्ञतां वदन्ति।

५. क्रियापवर्गेषु इत्यस्य कः अर्थः।

अनारतं तेन पदेषु लम्भिता विभज्य सम्यग्विनियोगसत्क्रियाः।
फलन्त्युपायाः परिबृंहितायतीरुपेत्य संघर्षमिवार्थसम्पदः।।१५

अन्वयः - तेन पदेषु सम्यक् विभज्य लम्भिताः विनियोगसत्क्रियाः उपायाः सङ्घर्षम् उपेत्य इव परिबृंहितायतीः अर्थसम्पदः अनारतं फलन्ति।

अन्वयार्थः - तेन दुर्योधनेन, पदेषु उपादेयवस्तुषु कर्तव्येषु, सम्यक् यथायोग्यम् समुचितरूपेण, विभज्य विविच्य विभाजनं कृत्वा, विनियोगसत्क्रियाः विनियोगेन व्यवहारेण सत्कारवन्तः, लम्भिताः प्रापिताः यथास्थानं प्रयुक्ताः, उपायाः सामदानदण्डभेदाः चत्वारः राजनीतेः उपायाः, संघर्षम् परस्परं स्पर्धाभावम्, उपेत्य इव प्राप्य इव, परिबृंहितायतीः परिबृंहिताः वृद्धिं गताः आयतिः भविष्यत् कालः यासां ताः परिबृंहितायतीः स्थिराः इत्यर्थः। अर्थसम्पदः धनसम्पत्तीः, अनारतं सततं निरन्तरम्, फलन्ति उत्पादयन्ति प्रसुवते।

सरलार्थः - स राजा दुर्योधनः उपादेयवस्तुषु कर्त्तव्यानुसारं यथायोग्यं विभागं कृतवान्। ततश्च तेन समुचितरूपेण ते चत्वारः राजनीतेः उपायाः प्रयुक्ताः। ते च परस्परं स्पर्धाभावं सम्प्राप्य तस्य अर्थसम्पत्तीः स्थिरां कुर्वन्ति। अर्थात् समुचितरूपेण प्रयुक्ताः एते सर्वे उपायाः सर्वत्र तस्मै साफल्यं समृद्धिं संयच्छन्ति।

तात्पर्यार्थः - प्रस्तुते अस्मिन् श्लोके वर्ण्यते यत् सामदानदण्डभेदानां चतुर्णाम् उपायानां विनियोगे दुर्योधनः कुशलः।अपि च तेन यथोचितं प्रयुक्ताः एते चत्वारः उपायाः। ते परस्परं स्पर्धां कुर्वन्तः तस्य दुर्योधनस्य सर्वेषु कार्येषु सफलतां तथा समृद्धिं सम्पादयन्ति।

व्याकरणविमर्शः -

- विनियोगसत्क्रियाः - विनियोग एव सत्क्रिया येषां ते विनियोगसत्क्रियाः।
- अर्थसम्पदः - अर्थाः एव सम्पदः अर्थसम्पदः।
- परिबृंहितायतीः - परिबृंहितः आयतिः यासां ताः परिबृंहितायतः, ताः परिबृंहितायतीः।
- लम्भिताः - लभ्-धातोः क्त-प्रत्यये प्रथमपुरुषबहुवचने रूपम्।

- विभज्य – वि-भज्-धातोः क्त्वोः ल्यपि रूपम्।

सन्धिकार्यम्-

- सम्यग्विनियोगसत्क्रिया = सम्यक् + विनियोगसत्क्रिया।
- फलन्त्युपायाः = फलन्ति + उपायाः।

प्रयोगपरिवर्तनम् -

तेन पदेषु सम्यक् विभज्य लम्भितैः विनियोगसत्क्रियैः उपायैः संघर्षम् उपेत्य इव परिबृंहितायतयः अर्थसम्पदः फल्यन्ते।

कोषः -

- अनारतम् - "सततानारताश्रान्तसन्तताविरतानिशम्"इत्यमरः।

पाठगतप्रश्नाः-२

६. केन कुत्र च ते उपायाः लम्भिताः।

७. ते च पदेषु तेन कथं लम्भिताः।

८. ते च उपायाः कथं किं फलन्ति।

९. लम्भिताः ते उपायाः किम् इव फलन्ति।

१०. परिबृंहितायतीः इत्यस्य कः अर्थः।

अनेकराजन्यरथाश्वसंकुलं तदीयमास्थाननिकेतनाजिरम्।
नयत्ययुग्मच्छदगन्धिरार्द्रतां भृशं नृपोपायनदन्तिनां मदः।।१६

अन्वयः - अयुग्मच्छदगन्धिः नृपोपायनदन्तिनां मदः अनेकराजन्यरथाश्वसंकुलं तदीयम् आस्थाननिकेतनाजिरं भृशम् आर्द्रतां नयति।

अन्वयार्थः - अयुग्मच्छदगन्धिः अयुग्मच्छदस्य सप्तपर्णपुष्पस्य गन्ध इव गन्धः यस्य असौ सप्तपर्णपुष्पसुगन्धिः, नृपोपायनदन्तिनां राज्ञाम् उपहारभूतानां गजानां राजोपहारहस्तिनाम्, मदः गण्डस्थलनिःसृतजलविशेषः, अनेकराजन्यरथाश्वसङ्कुलम् अनेकेषां बहूनाम् राजन्यानां क्षत्रियाणां रथाश्वेन संकुलं व्याप्तम् आकीर्णम् अनेकराजन्यरथाश्वसङ्कुलं नानरथपतिवृन्दरथघोटकसङ्कीर्णम्, तदीयम् दुर्योधनीयम् दुर्योधनसम्बन्धि, आस्थाननिकेतनाजिरम् आस्थानस्य सभायाः यत् निकेतनं गृहं मण्डपः तस्य अजिरम् अङ्गणम् आस्थाननिकेतनाजिरम् सभामण्डपाङ्गनम्, भृशम् अत्यर्थम् अत्यधिकम्, आर्द्रताम् पङ्किलत्वम्, नयति प्रापयति।

सरलार्थः - सप्तपर्णपुष्पस्य सुगन्ध इव सुगन्धयुतं राजभिः उपहारभूतानां गजानां मदजलं दुर्योधनस्य अङ्गणं पङ्किलतां प्रापयति। तत् च सभाभवनाङ्गणं बहूनां नृपाणां रथाश्वैः व्याप्तं वर्तते। एतेन राज्ञः दुर्योधनस्य प्रभुत्वस्य आतिशय्यं विशेषेण प्रकाशितो भवति।

तात्पर्यार्थः - प्रस्तुते अस्मिन् श्लोके दुर्योधनस्य अतिशयः प्रभावः निरूपितः। तथाहि बहवः राजानः तस्मै राज्ञे बहून् मदमत्तान् गजान् प्रभूतान् अश्वान् च प्रीत्या यच्छन्ति। तैः गजाश्वादिभिः तस्य राज्ञः सभामण्डपस्य प्राङ्गणम् प्रतिक्षणं परिपूर्यते। गजानां मदावारीणां स्रावैः सिक्तं भवति। एवं गजराजैः पूरितं तस्य अङ्गणं दुर्योधनस्य प्रभुत्वम् एव अतिशयेन प्रकाशयति।

व्याकरणविमर्शः -

- अनेकराजन्यरथाश्वसङ्कुलम्-राज्ञां समूहो राज्ञाम् अपत्यानि पुमांसो वा राजन्याः क्षत्रियाः। अनेके राजन्या इति अनेकराजन्याः। रथाश्च अश्वाश्च इति रथाश्वम्, तेषाम् अनेकराजन्यानां रथाश्वं तद् अनेकराजन्यरथाश्वं, तेन अनेकराजन्यरथाश्वेन सङ्कुलम् इति अनेकराजन्यरथाश्वसङ्कुलम्।
- आस्थाननिकेतनाजिरम्-आस्थानस्य निकेतनम् आस्थाननिकेतन, तस्य आस्थाननिकेतनस्य आजिरमिति आस्थाननिकेतनाजिरम् ।
- अयुग्मच्छदगन्धिः - अयुग्मानि (विषमाणि) सप्त छदाः (पत्राणि) यस्य सः, अयुग्मच्छदः । अयुग्मच्छदस्य गन्ध इव गन्धो यस्य सः अयुग्मच्छदगन्धिः।
- नृपोपायनदन्तिनाम् - उपायनानि दन्तिनः इति उपायनदन्तिनः। नृपाणां ये उपायनदन्तिनः ते नृपोपायनदन्तिनः, तेषां नृपोपायनदन्तिनाम्।

सन्धिकार्यम्-

- नयत्ययुग्मच्छदगन्धिरार्द्रताम् = नयति + अयुग्मच्छदगन्धिः + आर्द्रताम्।

प्रयोगपरिवर्तनम् -

अयुग्मच्छदगान्धिना नृपोपायनदन्तिनां मदेन अनेकराजन्यरथाश्वसंकुलं तदीयम् आस्थाननिकेतनाजिरं भृशम् आर्द्रतां नीयते।

कोषः -

- आजिरम् - “अङ्गनं चत्वराङ्गिरे"इत्यमरः।

पाठगतप्रश्नाः-३

११. दुर्योधनस्य किम् आर्द्रतां नयति।

१२. तच्च कथम् आर्द्रतां नयति।

१३. तच्च कीदृशम्।

१४. किं तस्य आस्थाननिकेतनाजिरम् आर्द्रतां नयति।

१५. अयुग्मच्छदगन्धिभिः इत्यस्य कः अर्थः।

सुखेन लभ्या दधतः कृषीवलैरकृष्टपच्या इव सस्यसम्पदः।
वितन्वति क्षेममदेवमातृकाश्चिराय तस्मिन्कुरवश्चकासति।।१७

अन्वयः - चिराय तस्मिन् क्षेमं वितन्वति (सति) अदेवमातृकाः कुरवः अकृष्टपच्याः इव कृषिवलैः सुखेन लभ्याः सस्यसम्पदः दधतः चकासति।

अन्वयार्थः - चिराय चिरकालं बहुकालेन, तस्मिन् दुर्योधने, क्षेमं प्रजासु कल्याणकुशलम्, वितन्वति कुर्वति सति, अदेवमातृकाः नदीमातृकाः नदीजलजीविनः, कुरवः कुरूणां निवासाः कुरवः देशविशेषाः, अकृष्टपच्याः अकर्षणसिद्धाः हलादिभिः कर्षणं विनैव सस्यजनितारः, इव, कृषीवलैः कर्षकैः क्षेत्रपतिभिः, सुखेन अल्पप्रयासेन, लभ्याः प्राप्याः लब्धुं शक्याः, सस्यसम्पदः सस्यराजीः धान्यसम्पत्तीः, दधतः धारयन्तः, चकासति शोभन्ते विराजन्ते।

सरलार्थः - बहुदिनं यावत् दुर्योधनः प्रजासु कल्याणं वितरन् अस्ति। तस्मिन् कल्याणविधानकाले कृत्रिमाभिः नदीभिः पालिताः नदीनां जलम् आश्रित्य एव कुरवः देशाः जीवन्ति। हलादिभिः कर्षणं विना एव एते कुरुदेशाः सस्यानाम् उत्पादकाः। तस्मात् कृषकैः सस्यसम्पदः अल्पायासेन लब्धुं शक्याः। एवं सस्यसम्पत्तीः धारयन्तः कुरुदेशाः शोभन्ते।

तात्पर्यार्थः - प्रस्तुते अस्मिन् श्लोके प्रतिपाद्यते यत् प्रजानां हितसाधने दुर्योधनः संलग्नः अस्ति। तस्यैव प्रयासेन समृद्धः कुरुदेशः शोभते। तथाहि प्रजापालनाय दुर्योधनः कृत्रिमं जलप्रवाहं निर्माय स्वराज्यं नदीमातृकं करोति। येन प्रजाः सुखेन सस्योत्पादनं कर्तुं शक्नुवन्ति। किञ्च स्वराज्यात् दुर्भिक्षं दूरीकरोति। एवं प्रजानाम् अनुरञ्जनात् प्रसिद्धः स दुर्योधनः सारल्येन वशीकर्तुं न योग्यः इति फलितम् अत्र।

व्याकरणविमर्शः -

- देव एव माता येषां ते देवमातृकाः, न देवमातृका इति अदेवमातृकाः ।
- कृषीवलैः - कृषिरस्ति येषां ते कृषीवलास्तैः कृषीवलैः । 'रजःकृषि-' इत्यनेन वलच्-प्रत्ययः।
- अकृष्टपच्याः - कृष्टेन पच्यन्ते इति कृष्टपच्याः, न कृष्टपच्याः इति अकृष्टपच्याः।
- लभ्याः - लभ्-धातोः यत्-प्रत्यये रूपमिदम्।
- चकासति - चकास्-धातोः लटि प्रथमपुरुषबहुवचने रूपमिदम्।

सन्धिकार्यम्-

- कृषिवलैरकृष्टपच्याः = कृषिवलैः + अकृष्टपच्याः।
- अदेवमातृकाश्चिराय = अदेवमातृकाः + चिराय।

प्रयोगपरिवर्तनम् -

चिराय तस्मिन् क्षेमं वितन्वति (सति) अदेवमातृकैः कुरुभिः अकृष्टपच्या इव कृषीवलैः सुखेन लभ्याः दधद्भिः चकास्यते।

कोषः -

- देवमातृकः - "देशो नद्यम्बुवृष्ट्यम्बुसम्पन्नव्रीहिपालितः। स्यान्नदीमातृको देवमातृकश्च यथाक्रमम्।।"इत्यमरः।

पाठगतप्रश्नाः-४

१६. कुरवः किं दधतः चकासति।

१७. ताश्च सम्पदः कैः सुखेन लभ्याः।

१८. कुरवः किम् इव ताः सम्पदः लभ्याः आसन्।

१९. कुरवः कदा सस्यसम्पदः दधतः चकासति।

२०. अदेवमातृकाः इत्यस्य कः अर्थः।

उदारकीर्तेरुदयं दयावतः प्रशान्तबाधं दिशतोऽभिरक्षया।
स्वयं प्रदुग्धेऽस्य गुणैरुपस्नुता वसूपमानस्य वसूनि मेदिनी।।१८

अन्वयः - उदारकीर्तेः दयावतः अभिरक्षया प्रशान्तबाधम् उदयं दिशतः वसूपमानस्य अस्य गुणैः उपस्नुता मेदिनी स्वयं वसूनि प्रदुग्धे।

अन्वयार्थः - उदारकीर्तेः उदारा उत्कृष्टा कीर्तिः यशः यस्य तस्य उदारकीर्तेः महायशसः, दयावतः करुणावतः, अभिरक्षया सर्वथा रक्षणेन, प्रशान्तबाधम् प्रशान्ता निवारिता बाधा अन्तरायः यस्मिन् तत् प्रशान्तबाधं प्रशमितोपद्रवम्, उदयम् अभ्युदयम् उन्नतिम्, दिशतः विधातुः, वसूपमानस्य वसुः कुवेरः उपमानं यस्य तस्य वसूपमानस्य कुबेरोपमस्य, अस्य दुर्योधनस्य, गुणैः औदार्यगाम्भीर्यशौर्यादिभिः, उपस्नुता द्रवीभूता, मेदिनी वसुन्धरा पृथिवी, स्वयम् आत्मना एव, वसूनि धनानि, प्रदुग्धे सुखेन प्रददाति।

सरलार्थः - महाकीर्तिमान् दुर्योधनः दयान्वितः सन् प्रजानां सर्वथा रक्षणं करोति। तथा संरक्षणेन च प्रजानाम् उपद्रवरहितम् अभ्युदयं संपादयति। धनाधिपतेः कुवेरस्य इव अस्य दुर्योधनस्य दयादाक्षिण्यादिभिः गुणैः पृथिवी द्रवीभूता सञ्जाता। एवं वसुन्धरा द्रवीभूता सती स्वयम् एव धनानि प्रयच्छति। अर्थात् याचनां विना एव सुखेन वसूनि प्रददाति।

तात्पर्यार्थः - कथं सद्गुणैः भूषितः दुर्योधनः सर्वतः प्रजाः रक्षति। किञ्च कथं तासां प्रजानाम् अभ्युदयं साधयति तदेव प्रस्तुते अस्मिन् श्लोके वर्ण्यते। तथाहि यथा कापि नवप्रसूता गौः

कोमलतृणदानेन तुष्टा सती स्वयं दुग्धं क्षरति। तद्वत् निर्जले देशे प्रजानां कल्याणविधानात् सन्तुष्टाः प्रजाः राज्ञः आज्ञां विना एव समये करं ददाति।

व्याकरणविमर्शः -

- उदारकीर्त्तेः - उदारा कीर्त्तिर्यस्य स उदारकीर्तिः, तस्य उदारकीर्त्तेः।
- दयावतः - दयाऽस्यास्तीति दयावान्, तस्य दयावतः।
- वसूपमानस्य - वसुः उपमानं यस्य स वसूपमानः,तस्य वसूपमानस्य।
- दिशतः - दिश्-धातोः शतरि रूपमिदम्।
- प्रदुग्धे - प्र-दुह्-धातोः आत्मनेपदिनः लटि रूपमिदम्।

सन्धिकार्यम्-

- उदारकीर्तेरुदयम् = उदारकीर्तेः + उदयम्।
- दिशतोऽभिरक्षया = दिशतः + अभिरक्षया।

प्रयोगपरिवर्तनम् -

उदारकीर्तेः दयावतः अभिरक्षया प्रशान्तबाधम् उदयं दिशतः वसूपमानस्य अस्य गुणैः उपस्नुतया मेदिन्या स्वयं वसूनि प्रदुह्यन्ते।

कोषः -

- दया - “कृपा दयाऽनुकम्पा स्याद्"इत्यमरः।

पाठगतप्रश्नाः-५

२१. मेदिनी स्वयं किं करोति।

२२. सा च कीदृशी।

२३. अत्र दुर्योधनः केन उपमितः।

२४. स दुर्योधनः कीदृशम् उदयं दिशति।

२५. कीदृशः दुर्योधनः प्रजाः अभिरक्षति।

महौजसो मानधना धनार्चिता धनुर्भृतः संयति लब्धकीर्तयः।
न संहतास्तस्य न भिन्नवृत्तयः प्रियाणि वाञ्छन्त्यसुभिः समीहितुम्।।१९

अन्वयः - महौजसः मानधनाः धनार्चिताः संयति लब्धकीर्तयः धनुर्भृतः न संहताः न भिन्नवृत्तयः (अपि तु) तस्य असुभिः प्रियाणि समीहितुं वाञ्छन्ति ।

अन्वयार्थः - महौजसः अतितेजस्विनः प्रतापिनः, मानधनाः मानः अभिमानः एव धनं येषां ते मानधनाः मनस्विनः, धनार्चिताः धनैः वित्तैः अर्चिताः सम्मानिताः ये ते धनार्चिताः धनसत्कृताः, संयति समरे युद्धे, लब्धकीर्त्तयः प्राप्तयशसः, धनुर्भृतः धनुर्धराः, न संहताः न संमिलिताः परस्परं स्वार्थसिद्ध्यै न मिलिताः इत्यर्थः, तथा च, न भिन्नवृत्तयः न पृथक् व्यापाराः, अपि तु सर्वे वीराः, तस्य दुर्योधनस्य, असुभिः प्राणैः, (अपि) प्रियाणि अभीष्टानि शुभानि, समीहितुं विधातुम्, वाच्छन्ति इच्छन्ति अभिलषन्ति।

सरलार्थः - महान्तः तेजस्विनः प्रभूतधनदानेन सम्मानिताः दुर्योधनस्य वीराः सैनिकाः युद्धे यशः प्राप्ताः। ते च धनुर्धराः स्वार्थसिद्ध्यर्थं न समागताः। किञ्च ते स्वस्वामिनः विरुद्धाः न सन्ति। अपि तु स्वामिनः प्रयोजनस्यैव साधकाः। तदर्थं च स्वेषां प्राणदानम् अपि कर्तुं ते अभिलषन्ति।

तात्पर्यार्थः - प्रस्तुते अस्मिन् श्लोके वीराणां सैनिकानां सुन्दरगुणानां वर्णनं क्रियते महाकविना भारविना। ते स्वामिनः हितसाधकाः। अतो लघुना उपायेन स दुर्योधनः न वश्यः इति किरातस्य अभिप्रायः। यतः तेजस्विनः ते धनुर्धराः सैनिकाः स्वार्थसिद्ध्यर्थं न समागताः। अपि तु ते स्वस्वामिनः प्रयोजनानि स्वप्राणव्ययेनापि संपादयितुम् इच्छन्ति।

व्याकरणविमर्शः -

- महौजसः - महद् ओजो येषां ते महौजसः इति बहुव्रीहिसमासः।
- मानधनाः - मान एव धनं येषां ते मानधनाः इति बहुव्रीहिसमासः।
- लब्धकीर्त्तयः - लब्धा कीर्तिर्यैस्ते लब्धकीर्त्तयः इति बहुव्रीहिसमासः।
- धनुर्भृतः - धनूंषि बिभ्रतीति धनुर्भृत्, ते धनुर्भृतः।
- समीहितुम् - सम्-ईह-धातोः तुमुन्-प्रत्यये रूपमिदम्।

सन्धिकार्यम्-

- वाञ्छन्त्यसुभिः = वाञ्छन्ति + असुभिः।
- संहतास्तस्य = संहताः + तस्य।

प्रयोगपरिवर्तनम् -

महौजोभिः मानधनैः धनार्चितैः धनुर्भृद्भिः संयति लब्धकीर्तिभिः न संहतैः न भिन्नवृत्तिभिः भूयन्ते । किन्तु असुभिरपि प्रियाणि समीहितुं वाञ्छ्यन्ते।

कोषः -

- असुः - "पुंसि भूम्न्यसवः प्राणाश्चैवं जीवोऽसुधारणम्"इत्यमरः।

पाठगतप्रश्नाः-६

२६. दुर्योधनस्य सैनिकाः कीदृशाः।

२७. ते कुत्र लब्धकीर्तयः।

२८. ते किं वाञ्छन्ति।

२९. कैश्च ते वाञ्छयन्ते।

३०. धनुर्भृतः ते कीदृशाः।

महीभृतां सच्चरितैश्चरैः क्रियाः स वेद निःशेषमशेषितक्रियः।
महोदयैस्तस्य हितानुबन्धिभिः प्रतीयते धातुरिवेहितं फलैः।।२०

अन्वयः - अशेषितक्रियः सच्च्चरितैः चरैः महीभृतां क्रियाः निःशेषं वेद। हितानुबन्धिभिः महोदयैः धातुः ईहितम् इव तस्य (ईहितम्) फलैः,प्रतीयते ।

अन्वयार्थः - अशेषितक्रियः न शेषिताः न असमापिताः क्रियाः कर्तव्याणि येन सः असमापितक्रियः समापितकृत्यः, सः दुर्योधनः, सच्चरितैः शुद्धचरितैः, चरैः गूढचरैः, महीभृतां भूपतीनाम्, क्रियाः कार्याणि सकलव्यापारान्, निःशेषम् अशेषम् संपूर्णम्, वेद वेत्ति जानाति। (अथ) हितानुबन्धिभिः सदा कल्याणकरणतत्परैः, महोदयैः महानुभावैः अन्यैः भूपैः। धातुः ईश्वरस्य, ईहितं चेष्टितम्, इव, तस्य = दुर्योधनस्य, ईहितम् ईप्सितम्, फलैः परिणामैः, प्रतीयते ज्ञायते।

सरलार्थः - सकलानि राजकार्याणि समाप्य स दुर्योधनः शुद्धचरितैः अवञ्चकैः गुप्तचरैः च सर्वेषां भूपतीनां व्यवहारान् गूढरूपेण जानाति। किन्तु यथा विधाता किं कर्तुम् इच्छति इति तस्य कार्यैः एव ज्ञायते। तद्वत् तस्यापि दुर्योधनस्य मनसि ईप्सितं कर्म तस्य हितकारकैः परिणामैः एव ज्ञायते।

तात्पर्यार्थः - महाकविना भारविना प्रस्तुते अस्मिन् श्लोके स्वमन्त्रस्य गोपने तथा परवृत्तान्तस्य ज्ञाने दुर्योधनस्य चरव्यवस्था निरूपिता। तथाहि समापितक्रियः दुर्योधनः गुप्तचराणां साहाय्येन सर्वेषां राज्ञां गूढव्यवहारं सम्पूर्णं जानाति। तस्य मानसिकः संकल्पः तस्य कार्यस्य परिणामद्वारा प्रतीयते। अतः सः सारल्येन न जेयः इति विशेषः।

व्याकरणविमर्शः -

- महीभृताम् - महीं बिभ्रतीति महीभृतः, तेषां महीभृताम्।
- सच्चरितैः - सत् (शुभं) चरितं येषां ते सच्चरिताः इति बहुव्रीहिसमासः, तैः सच्चरितैः।
- अशेषितक्रियः - न शेषिता अशेषिता इति नञ्तत्पुरुषसमासः,अशेषिता क्रिया येन सः अशेषितक्रियः इति बहुव्रीहिसमासः।
- हितानुबन्धिभिः - हितम् अनुबध्नन्तीति हितानुबन्धिनः, तैः हितानुबन्धिभिः।
- वेद – विद्-धातोः लटि प्रथमपुरुषैकवचने रूपमिदम्।

सन्धिकार्यम्-

- सच्चरितैश्चरैः = सच्चरितैः + चरैः।
- धातुरिवेहितम् = धातुः + इव + ईहितम्।

- महोदयैस्तस्य = महोदयैः + तस्य।

प्रयोगपरिवर्तनम् -

अशेषितक्रियेण येन दुर्योधनेन सञ्चरितैश्चरैरन्येषां महीभृतां क्रियाः ज्ञायन्ते (विद्यन्ते) हितानुबन्धिना महोदयाः धातुरीहितमिव तस्य चेष्टितम्, फलैः प्रतियन्ति।

अलङ्कारालोचना -

- अस्मिन् श्लोके अपि धातुरिव तस्य इति साम्यप्रतिपादनात् उपमा अलङ्कारः।

कोषः -

- धाता - "स्रष्टा प्रजापतिर्वेधा विधाता विश्वसृग्विधिः"इत्यमरः।

पाठगतप्रश्नाः-७

३१. दुर्योधनः केषां क्रियाः निःशेषं वेद।

३२. स च कैः तत् वेद।

३३. स च दुर्योधनः कीदृशः।

३४. धातुः ईहितं केन प्रतीयते।

३५. कीदृशैः फलैः दुर्योधनस्य ईहितं प्रतीयते।

न तेन सज्यं क्वचिदुद्यतं धनुः कृतं न वा कोपविजिह्ममाननम्।
गुणानुरागेण शिरोभिरुह्यते नराधिपैर्माल्यमिवास्य शासनम्।।२१

अन्वयः - तेन क्वचित् सज्यं धनुः न उद्यतं वा कोपविजिह्मम् आननम् न कृतं गुणानुरागेण नराधिपैः अस्य शासनं माल्यमिव शिरोभिः उह्यते।

अन्वयार्थः - तेन राज्ञा दुर्योधनेन, क्वचित् कुत्रापि, सज्यम् सगुणं समौर्वीकम् आरोपितमौर्वीकम्। धनुः चापं कार्मुकम्, न उद्यतम् न ऊर्ध्वीकृतम् उत्थापितम्, वा अथवा, कोपविजिह्मम् कोपेन क्रोधेन विजिह्मं वक्रं कोपविजिह्मम् क्रोधकुटिलम्, आननम् मुखम्, न कृतम् न विहितम्, नराधिपैः नरेन्द्रैः, अस्य दुर्योधनस्य,शासनम् आदेशवचनम्, गुणानुरागेन दयादानादिना स्नेहेन, अथवा गुणेषु सूत्रेषु अनुरागेण गुम्फितेन, माल्यम् स्रक् ग्रथितः पुष्पसमूहः, इव, शिरोभिः शीर्षैः, उह्यते धार्यते।

सरलार्थः - तेन राज्ञा दुर्योधनेन कुत्रापि आरोपितमौर्वीकं धनुः न उत्थापितम्। अथवा स्वकीयं मुखं कोपेन विकृतं न कृतम्। तथापि नृपतिभिः अस्य दुर्योधनस्य आदेशवचनं सादरं पुष्पमाला इव स्वीक्रियते। यथा गुणे सूत्रे संग्रथिता पुष्पमाला स्वमस्तके सादरं धार्यते। अर्थात् सर्वे राजानः प्रसन्नाः सन्तः तस्य शासनस्य अनुगमनं कुर्वन्ति इत्यर्थः।

तात्पर्यार्थः - सद्गुणैः अलङ्कृतस्य दुर्योधनस्य समृद्धः प्रभावः अत्र निरूपितः। संप्रति कोऽपि राजा दुर्योधनस्य प्रतिकुलं न आचरति। यतो तेन न कदापि कोपेन जनानां वशीकरणाय धनुः उत्थापितम्। कदापि न तस्य आनने क्रोधविकारः न दृष्टः। तथापि तस्य गुणगणैः वशीकृताः राजानः तस्य आज्ञां माल्यम् इव स्वमस्तके स्वीकुर्वन्ति।

व्याकरणविमर्शः -

- सज्यम् - ज्यया सहितं सज्यम् इति तृतीयातत्पुरुषः।
- कोपविजिह्मम् - कोपेन विजिह्मं कोपविजिह्मम्।
- गुणानुरागेण - गुणेषु अनुरागो गुणानुरागस्तेन गुणानुरागेण।
- नराधिपैः - नराणामधिपा नराधिपाः तैः नराधिपैः।
- उह्यते - वह-धातोः कर्मणि लटि रूपमिदम्।

सन्धिकार्यम्-

- शिरोभिरुह्यते = शिरोभिः + उह्यते।
- नराधिपैर्माल्यम् = नराधिपैः + माल्यम्।

प्रयोगपरिवर्तनम् -

स क्वचित् सज्यं धनुः नोद्यतवान् । वा कोपविजिह्मम् आननं न कृतवान् । नराधिपाः गुणानुरागेण अस्य शासनं माल्यमिव शिरोभिः वहन्तीति ।

अलङ्कारालोचना -

- श्लोके अस्मिन् माल्यमिव शासनम् इति द्वयोः साम्यप्रतिपादनात् उपमा अलङ्कारः।

कोषः -

- कोपः - "कोपक्रोधामर्षरोषप्रतिघा रुट् क्रुधौ खियौ"इत्यमरः।

पाठगतप्रश्नाः-८

३६. दुर्योधनेन किं न क्वचिद् अपि उद्यतम्।

३७. तेन च आननं कीदृशं न कृतम्।

३८. नराधिपैः किं शिरोभिः उह्यते।

३९. तच्च किम् इव शिरोभिः उह्यते।

४०. नराधिपैः किमर्थं शासनं शिरोभिः उह्यते।

स यौवराज्ये नवयौवनोद्धतं निधाय दुःशासनमिद्धशासनः।

मखेष्वखिन्नोऽनुमतः पुरोधसा धिनोति हव्येन हिरण्यरेतसम्।।२२

अन्वयः - इद्धशासनः सः यौवराज्ये नवयौवनोद्धतं दुःशासनं निधाय मखेषु अखिन्नः पुरोधसा अनुमतः (सन्) हव्येन हिरण्यरेतसं धिनोति ।

अन्वयार्थः - इद्धशासनः इद्धं उग्रं शासनं यस्य स इद्धशासनः उग्रशासनः, सः दुर्योधनः, यौवराज्ये युवराजाधिकारे युवराजपदे, नवयौवनोद्धतं नवं नूतनं यत् यौवनं तारुण्यं तेन उद्धतं प्रगल्भितम् नवयौवनोद्धतं नूतनतारुण्यप्रगल्भम्, दुःशासनम् एतन्नामानम् स्वस्य अनुजम्, निधाय नियुज्य संस्थाप्य, मखेषु यज्ञेषु, अखिन्नः प्रसन्नः, पुरोधसा पुरोहितेन, अनुमतः अनुज्ञातः आदिष्टः (सन्) हव्येन हविषा, हिरण्यरेतसम् पावकम् अग्निम्, धिनोति जुहोति तर्पयति।

सरलार्थः - उग्रशासनः दुर्योधनः युवराजपदे स्वस्य कनिष्ठभ्रातरं दुःशासनं नियुक्तवान्। स्वयं च निश्चिन्तो भूत्वा पुरोहितानाम् आदेशानुसारं हविषा अग्निं प्रीणयति। एवं स दुर्योधनः यागादिषु कर्मसु प्रसन्नः सन् धर्मम् आचरति।

तात्पर्यार्थः - अस्मिन् श्लोके महाकविः भारविः दुर्योधनस्य धर्माचरणं निरूपयति। तथाहि सामादिना राज्यं सुदृढं कृत्वा देवसहायलाभाय यागादिना धर्मकर्मणा धर्मं समाचरति। तदर्थं च राजकार्यस्य परिचालनभारं स्वभ्रात्रे दुर्योधनाय प्रदत्तवान्। किञ्च, पुरोहितस्य आज्ञानुसारं यागादीनि अनुष्ठानानि आरभते।

व्याकरणविमर्शः -

- यौवराज्ये - युवा चासौ राजा चेति युवराजः इति कर्मधारयः, तस्य कर्म यौवराज्यम् इति तत्पुरुषसमासः, तस्मिन् यौवराज्ये ।
- नवयौवनोद्धतम् - नवं चासौ यौवनं चेति नवयौवनम् इति कर्मधारयः, नवयौवनेन उद्धतो नवयौवनोद्धतः इति तृतीयातत्पुरुषः, तं नवयौवनोद्धतम् ।
- इद्धशासनम् - इद्धं शासनं यस्य स इद्धशासनः इति बहुव्रीहिसमासः, तम् इद्धशासनम्।
- हिरण्यरेतसम् - हिरण्यं (सुवर्णं) रेतो यस्य स हिरण्यरेताः इति बहुव्रीहिसमासः, तं हिरण्यरेतसम्।
- निधाय – नि-धा-धातोः क्त्वोः ल्यपि रूपमिदम्।

सन्धिकार्यम्-

- मखेष्वखिन्नोऽनुमतः = मखेषु + अखिन्नः + अनुमतः।

प्रयोगपरिवर्तनम् -

तेन इद्धशासनेन यौवराज्ये नवयौवनोद्धतं दुःशासनं निधाय मखेषु अखिन्नेन पुरोधसाऽनुमतेन हव्येन हिरण्यरेताः धिन्व्यते ।

कोषः -

- हिरण्यरेतः - "हिरण्यरेतहुतभुग्दहनो हव्यवाहनः"इत्यमरः।

पाठगतप्रश्नाः-९

४१. कीदृशः दुर्योधनः हिरण्यरेतसं धिनोति।

४२. स च कं कुत्र नियुक्तवान्।

४३. दुर्योधनः केन हिरण्यरेतसं धिनोति।

४४. कस्मिन् विषये अखिन्नः दुर्योधनः हिरण्यरेतसं धिनोति।

४५. स च केन अनुमतः हिरण्यरेतसं धिनोति।

प्रलीनभूपालमपि स्थिरायति प्रशासदावारिधि मण्डलं भुवः।
स चिन्तयत्येव भियस्त्वदेष्यतीरहो दुरन्ता बलवद्विरोधिता।।२३

अन्वयः - सः प्रलीनभूपालं स्थिरायति आवारिधि भुवः मण्डलम् प्रशासत् अपि त्वत् एष्यतीः भियः, चिन्तयति एव। अहो बलवद्विरोधिता दुरन्ता भवति।

अन्वयार्थः - सः दुर्योधनः, प्रलीनभूपालम् प्रलीनाः पराभूताः भूपालाः राजानः यस्मिन् तत् प्रलीनभूपालम् निःसपत्नम्, स्थिरायति चिरस्थायि सदा वर्त्तमानम्, आवारिधि आसमुद्रम् समुद्रपर्यन्तम्, भुवः पृथिव्याः, मण्डलम् खण्डम्, प्रशासत् शासनं कुर्वन् आज्ञापयन्, अपि, त्वत् भवतः युधिष्ठिरस्य सकाशात्, एष्यतीः आगामिनीः, भियः विपदः, चिन्तयति आलोचयति एव। अहो (सखेदः) बलवद्विरोधिता महाजनवैरिता पराक्रमशीलैः सह शत्रुता, दुरन्ता दुरवसाना दुःखपरिणामा भवतीति शेषः ।। २३ ।।

सरलार्थः - सर्वान् भूपालान् पराजित्य शत्रुरहितं चिरस्थायि सम्पूर्णं भूमण्डलं स दुर्योधनः एकाकी एव शास्ति। किन्तु आत्मनः पराजयं शङ्कमानः स त्वत्तः बिभेति। तस्मात् सः सुखेन स्थातुं न शक्नोति। यतो हि बलबद्भिः सह विरोधः दुष्परिणामः भवति।

तात्पर्यार्थः - अस्मिन् श्लोके महाकविः भारविः वर्णयति यत् दुर्योधनः शत्रुरहितस्य भूमण्डलस्य अद्वितीयः शासकः इति सत्यम्। किन्तु तथापि सः स्वस्य पराजयं शङ्कमानः युधिष्ठिरात् बिभेति। यतो हि महद्भिः सह विरोधः सर्वदा समूलनाशाय एव भवति।

व्याकरणविमर्शः -

- प्रलीनभूपालम् - प्रलीना भूपाला यस्मिन् तत् प्रलीनभूपालम् इति बहुव्रीहिसमासः।
- स्थिरायति - स्थिरा आयतिः (उत्तरकालः) यस्य तत् स्थिरायति इति बहुव्रीहिसमासः।
- आवारिधि - आ वारिधिभ्य इति आवारिधि इति अव्ययीभावसमासः।
- बलवद्विरोधिता - बलमस्यास्तीति बलवान्, बलवद्भिः विरोधिता बलवद्विरोधिता इति तृतीयातत्पुरुषः।

- प्रशासत् - प्र-शास्-धातोः (लटः) शतरि रूपमिदम्।
- एष्यतीः - इण्-धातोः (लृटः) शतरि रूपमिदम्।

सन्धिकार्यम्-

- चिन्तयत्येव = चिन्तयति + एव।
- भियस्त्वदेष्यतीरहो = भियः + त्वदेष्यतीः + अहो।

प्रयोगपरिवर्तनम् -

तेन दुर्योधनेन प्रलीनभूपालं स्थिरायति, आवारिधि भुवो मण्डलं प्रशासता,त्वदेष्यत्यो भियः चिन्त्यन्ते एव । अहो वलवद्विरोधितया दुरन्तया भूयते।

अलङ्कारालोचना -

- अत्र चतुर्थपादेन पादत्रयगतस्य अर्थस्य समर्थनाद् अर्थान्तरन्यासः अलङ्कारः।

कोषः -

- भीः - "भीतिर्भीः साध्वसं भयम्"इत्यमरः।

पाठगतप्रश्नाः१०

४६. स दुर्योधनः कीदृशं मण्डलं शास्ति।

४७. बलवद्विरोधिता कथं भवति।

४८. सः किं चिन्तयति एव।

४९. प्रलीनभूपालम् इत्यस्य कः अर्थः।

५०. आवारिधि इत्यस्य कः अर्थः।

पाठसारः

शत्रूणां बलस्य आधिक्यात् राजा दुर्योधनः शङ्कितः अस्ति। अतः स्वकीये परकीये च राज्ये आत्मीयान् जनान् संरक्षकरूपेण संस्थाप्य विश्वस्ताकृतिं प्राप्नोति। मनसि भयम् अनुभवन् अपि आत्मानं भयरहितं प्रकटयति। कर्मणाम् अवसानेषु सेवकेभ्यः समर्पिताः सम्पत्तयः दुर्योधनस्य कृतज्ञतां च प्रकाशयन्ति। स राजा दुर्योधनः उपादेयवस्तुषु कर्त्तव्यानुसारं यथायोग्यं विभागं कृतवान्। ततश्च तेन समुचितरूपेण ते चत्वारः राजनीतेः उपायाः प्रयुक्ताः। ते च परस्परं स्पर्धाभावं सम्प्राप्य तस्य अर्थसम्पत्तीः स्थिरां कुर्वन्ति। अर्थात् समुचितरूपेण प्रयुक्ताः एते सर्वे उपायाः सर्वत्र तस्मै साफल्यं

समृद्धिं संयच्छन्ति। सप्तपर्णपुष्पस्य सुगन्ध इव सुगन्धयुतं राजभिः उपहारभूतानां गजानां मदजलं दुर्योधनस्य अङ्गणं पङ्किलतां प्रापयति। तत् च सभाभवनाङ्गणं बहूनां नृपाणां रथाश्वैः व्याप्तं वर्तते। एतेन राज्ञः दुर्योधनस्य प्रभुत्वस्य आतिशय्यं विशेषेण प्रकाशितो भवति। बहुदिनं यावत् दुर्योधनः प्रजासु कल्याणं वितरन् अस्ति। तस्मिन् कल्याणविधानकाले कृत्रिमाभिः नदीभिः पालिताः नदीनां जलम् आश्रित्य एव कुरवः देशाः जीवन्ति। हलादिभिः कर्षणं विना एव एते कुरुदेशाः सस्यानाम् उत्पादकाः। तस्मात् कृषकैः सस्यसम्पदः अल्पायासेन लब्धुं शक्याः। एवं सस्यसम्पत्तीः धारयन्तः कुरुदेशाः शोभन्ते। महाकीर्तिमान् दुर्योधनः दयान्वितः सन् प्रजानां सर्वथा रक्षणं करोति। तथा संरक्षणेन च प्रजानाम् उपद्रवरहितम् अभ्युदयं संपादयति। धनाधिपतेः कुवेरस्य इव अस्य दुर्योधनस्य दयादाक्षिण्यादिभिः गुणैः पृथिवी द्रवीभूता सञ्जाता। एवं वसुन्धरा द्रवीभूता सती स्वयम् एव धनानि प्रयच्छति। अर्थात् याचनां विना एव सुखेन वसूनि प्रददाति। महान्तः तेजस्विनः प्रभूतधनदानेन सम्मानिताः दुर्योधनस्य वीराः सैनिकाः युद्धे यशः प्राप्ताः। ते च धनुर्धराः स्वार्थसिद्ध्यर्थं न समागताः। किञ्च ते स्वस्वामिनः विरुद्धाः न सन्ति। अपि तु स्वामिनः प्रयोजनस्यैव साधकाः। तदर्थं च स्वेषां प्राणदानम् अपि कर्तुं ते अभिलषन्ति। सकलानि राजकार्याणि समाप्य स दुर्योधनः शुद्धचरितैः अवञ्चकैः गुप्तचरैः च सर्वेषां भूपतीनां व्यवहारान् गूढरूपेण जानाति। किन्तु यथा विधाता किं कर्तुम् इच्छति इति तस्य कार्यैः एव ज्ञायते। तद्वत् तस्यापि दुर्योधनस्य मनसि ईप्सितं कर्म तस्य हितकारकैः परिणामैः एव ज्ञायते। तेन राज्ञा दुर्योधनेन कुत्रापि आरोपितमौर्वीकं धनुः न उत्थापितम्। अथवा स्वकीयं मुखं कोपेन विकृतं न कृतम्। तथापि नृपतिभिः अस्य दुर्योधनस्य आदेशवचनं सादरं पुष्पमाला इव स्वीक्रियते। यथा गुणे सूत्रे संग्रथिता पुष्पमाला स्वमस्तके सादरं धार्यते। अर्थात् सर्वे राजानः प्रसन्नाः सन्तः तस्य शासनस्य अनुगमनं कुर्वन्ति इत्यर्थः। उग्रशासनः दुर्योधनः युवराजपदे स्वस्य कनिष्ठभ्रातरं दुःशासनं नियुक्तवान्। स्वयं च निश्चिन्तो भूत्वा पुरोहितानाम् आदेशानुसारं हविषा अग्निं प्रीणयति। एवं स दुर्योधनः यागादिषु कर्मसु प्रसन्नः सन् धर्मम् आचरति। सर्वान् भूपालान् पराजित्य शत्रुरहितं चिरस्थायि सम्पूर्णं भूमण्डलं स दुर्योधनः एकाकी एव शास्ति। किन्तु आत्मनः पराजयं शङ्कमानः स त्वत्तः बिभेति। तस्मात् सः सुखेन स्थातुं न शक्नोति। यतो हि बलवद्भिः सह विरोधः दुष्परिणामः भवति।

पाठान्तप्रश्नाः

१. शङ्कितः दुर्योधनः कथम् अशङ्किताकारम् उपैति।

२. तस्य सर्वे उपायाः सर्वत्र कथं तस्मै साफल्यं समृद्धिं च संयच्छन्ति।

३. तस्य आस्थाननिकेतनाजिरं भृशम् आर्द्रतां नयति एतेन कथम् अतिशयेन तस्य प्रभुत्वं प्रकटितं भवति।

४. दुर्योधनस्य प्रजारक्षणं कथम् आसीत्।

५. तस्य सैनिकाः कथम् आसीत् इति वर्ण्यताम्।

६. अदेवमातृकाः अपि कुरवः कथं सस्यसम्पत्तीः दधतः चकासति।

७. तस्य कार्यं कथं फलैः ज्ञायते स्म।

८. नराधिपाः तेन प्रभाविताः आसन् इति दृष्टान्तः वर्ण्यताम्।

९. दुर्योधनः किं किं कृत्वा धर्माचरणं करोति।

१०. बलवद्विरोधिता कथं दुरन्ता भवति।

११. समानार्थकानि धातुरूपाणि मेलयत।

क-स्तम्भः	**ख-स्तम्भः**
१. धिनोति	क. धार्यते।
२. प्रतीयते	ख. जुहोति।
३. उपैति	ग प्राप्नोति।
४. फलन्ति	घ प्रदोग्धि।
५. चकासति	ङ. अभिलषति।
६. प्रदुग्धे	च. प्रसुवते।
७.वाञ्छति	छ. विराजन्ते।
८. उह्यते	ज. ज्ञायते।

उत्तराणि - १-ख, २-ज, ३-ग, ४-च, ५-छ, ६-घ, ७-ङ, ८- क।

किमधिगतम्

१) दुर्योधनः कथं भीतः आसीत् इति अस्मात् पाठात् ज्ञायते।

२) राजा दुर्योधनः सारल्येन जेतुम् अशक्यः आसीत् इत्यपि ज्ञायते।

३) राजसु तस्य प्रभावः कथम् आसीत् इति स्पष्टं भवति।

४) वीराः सैनिकाः प्रकृत्या कथं प्रभुकार्ये निरताः भवन्ति इति स्पष्टम्।

५) बलवद्भिः सह विरोधिता दुरन्ता भवति इति ज्ञातम्।

६) समासः तस्य विग्रहश्च कथं भवतीति बुध्यते अस्मात् पाठात्।

पाठगतप्रश्नानामुत्तराणि

उत्तराणि-१

१. दुर्योधनः।

२. शङ्कितः सन्।

३. परितः परेतरान् रक्षान् विधाय।

४. क्रियापवर्गेषु अनुजीविसात्कृताः सम्पदः।

५. कार्यावसानेषु।

उत्तराणि-२

६. दुर्योधनेन, पदेषु।

७. सम्यक् विभज्य।

८. अनारतम्, परिबृंहितायतीः अर्थसम्पदः।

९. सङ्घर्षम् उपेत्य इव।

१०. स्थिराः।

उत्तराणि-३

११. आस्थाननिकेतनाजिरम्।

१२. भृशम्।

१३. अनेकराजन्यरथाश्वसंकुलम्।

१४. अयुग्मच्छदगन्धिः नृपोपायनदन्तिनां मदः।

१५. सप्तपर्णपुष्पस्य गन्ध इव गन्धः यस्य असौ।

उत्तराणि-४

१६. सस्यसम्पदः।

१७. कृषिवलैः।

१८. अकृष्टपच्याः इव।

१९. चिराय क्षेमं वितन्वति दुर्योधने।

२०. नदीजलजीविनः।

उत्तराणि-५

२१. वसूनि प्रदुग्धे।

२२. अस्य दुर्योधनस्य गुणैः उपस्नुता।

२३. वसुना।

२४. प्रशान्तबाधम्।

२५. उदारकीर्तिः दयावान्।

उत्तराणि-६

२६. महौजसः मानधनाः धनार्चिताः।

२७. संयति।

२८. प्रियाणि समीहितुम्।

२९. असुभिः।

३०. न संहताः न भिन्नवृत्तयः।

उत्तराणि-७

३१. महीभृताम्।

३२. सच्चरितैः चरैः।

३३. अशेषितक्रियः।

३४. तस्य फलैः।

३५. हितानुबन्धिभिः महोदयैः।

उत्तराणि-८

३६. सज्यं धनुः।

३७. कोपविजिह्मम्।

३८. दुर्योधनस्य शासनम्।

३९. माल्यम् इव।

४०. गुणानुरागेण।

उत्तराणि-९

४१. इद्धशासनः।

४२. यौवराज्ये, नवयौवनोद्धतम् दुःशासनम्।

४३. हव्येन।

४४. मखेषु।

४५. पुरोधसा।

उत्तराणि-१०

४६. प्रलीनभूपालं स्थिरायति आवारिधि भुवः मण्डलम्।

४७. दुरन्ता।

४८. त्वत् एष्यतीः भियः।

४९. निःसपत्नम्।

५०. समुद्रपर्यन्तम्।

॥ इति एकविंशः पाठः ॥